Class 10 Sanskrit Sample Paper 2023



अभ्यास-प्रश्नपत्रम् (2022-23)

कक्षा - दशमी

विषय – संस्कृतम् (122)

वार्षिक परीक्षा

समय-होरात्रयम् **अङ्का:-80**

सामान्यनिर्देशा :

- अस्मिन् प्रश्नपत्रे प्रश्ना: सन्ति।
- अस्मिन् प्रश्नपत्रे चत्वार: खण्डा: सन्ति।
- उत्तरलेखनात् पूर्वं प्रश्नक्रमांक: अवश्यं लेखनीय:।
- उत्तराणि संस्कृतेन एव लेखनीयानि।

प्रश्नपत्र-स्वरुपम्-

- **खण्ड: (क) अपठितावबोधनम् – 10 अङ्का:**
- **खण्ड: (ख) रचनात्मक – कार्यम् - 15 अङ्का:**
- **खण्ड: (ग) अनुप्रयुक्त- व्याकरणम् – 25 अङ्का:**
- **खण्ड: (घ) पठितावबोधनम् - 30 अङ्का:**

प्रश्न -1 अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानां उत्तराणि संस्कृतेन लिखत- 10

राजस्थानं क्षेत्रफलदृष्ट्या भारतस्य बृहत्तम: राज्य: अस्ति।अस्य राजधानी जयपुरम् अस्ति।अस्य नगरस्य मुख्यमार्गेषु निर्मितानि भवनानि किञ्चित रक्तवर्णियानि, अतः अस्य अपरं नाम “गुलाबी नगरी” इति प्रसिद्धम्। जयपुरस्य वास्तुकार: विद्याधर -शास्त्री आसीत्। 1727 तमे वर्षे महाराजा- सवाई -जयसिंह नृपेण अस्य नगरस्य स्थापना कृता। अस्य पूर्वदिशि सूर्यमंदिरम् गालवऋषे:च आश्रम: अस्ति। मध्ये “जंतर - मंतर” वेधशाला अस्ति।यत्र खगोलविज्ञानस्य विद्यार्थिन: शोधं कुर्वन्ति। उत्तरे आमेर- राजभवनं विश्वप्रसिद्धं अस्ति। 2013 तमे वर्षे आमेर राजभवनं यूनेस्को इति परिषद् “विश्वधरोहर” इति घोषितम् अकरोत्।

अ- एकपदेन उत्तरत (केवलं प्रश्नद्वयम्) 1 x 2 = 2

i. भारतस्य बृहत्तम: राज्य: क:?
ii. राजस्थानस्य राजधानी कुत्र अस्ति?
iii. जयपुरनगरस्य स्थापना कस्मिन् वर्षे अभवत्?

आ- पूर्णवाक्येन उत्तरत-(केवलं प्रश्नद्वयम्) 2 x 2 = 4

I. किम् “विश्वधरोहर” इति घोषितम्?
II. जयपुरस्य पूर्वदिशि किम् अस्ति?
III. जयपुरस्य वास्तुकार क: आसीत् ?

docs.aglasem.com

aglasem.com

इ-अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत- (1)

ई – यथानिर्देशम् उत्तरत –(केवलं प्रश्नत्रयम्)   1 x 3 = 3

1."खगोलविज्ञानस्य विद्यार्थिन: शोधं कुर्वन्ति" इति वाक्ये क्रियापदं किम्?

A. कुर्वन्ति   C.विद्यार्थिन:
B. शोधं   D .खगोलविज्ञानस्य

2."राज्य" इति विशेष्यपदस्य विशेषणपदं किम्?

A. अस्ति   C. भारतस्य
B. बृहत्तम: D. राजस्थानम्

3.राज्ञा इति पदस्य किं पर्यायपदं गद्यांशे प्रयुक्तम्?

A. नृपेण   B.नगरस्य

C. मध्ये.   D.अस्य

4."अकरोत्" इति क्रियापदस्य कर्तृपदं किम्?

A.घोषितम्   B.आमेर

C.परिषद्   D.राजभवनम्

खण्ड -ख

रचनात्मकं कार्यम् (15अङ्का:)

प्रश्न -2 मित्रं प्रति अधोलिखितं पत्रं मंजूषापद सहायतया पूरयित्वा पुनः लिखत-   1/2 x 10= 5

महाराज-संस्कृत-विद्यालय:

छात्रावास:

तिथि: ………...

प्रिय मित्र! …1………….

सस्नेहं नमस्ते।

अत्र सर्वं कुशलम् । भवान् अपि कुशली इति मन्ये । गतसप्ताहे अस्माकं…2…………….. संस्कृत- संभाषण-शिविरम्………3…… आसीत् । दशदिनानि यावत् वयं संस्कृत- संभाषणस्य………4…….. अकुर्म: । तत्र लघुनाटिकाया:………5………….. अपि अभवत् ।अहं तु विदूषकस्य………6……… कृतवान्, सर्वेजना: हसित्वा………7………. अकुर्वन् ।अहम् इदानीं सर्वदा संस्कृतेन एव………8…….. । भवान् अपि संस्कृतेन संभाषणस्य………9…….. करोतु ।पितरौ………10…………. प्रणामाञ्जलिं निवेदयतु।

भवत: मित्र

कश्यप:

docs.aglasem.com

aglasem.com

मञ्जूषा

अभ्यासम्, अभिनयम्, विद्यालये, प्रति, सौरभ!, अभिनयः, करतलध्वनिम्, आयोजितम्, वदामि, अभ्यासम्

प्रश्न -3 प्रदत्तचित्रं दृष्ट्वा मंजूषायां प्रदत्तशब्दानां सहायतया पञ्चवाक्यनि संस्कृतेन लिखत- 1 x 5 = 5

मञ्जूषा

पङ्के -उत्पन्नः, कमलम्, राष्ट्रीय- पुष्पम्, कोमलम्, जलजः, तडागेषु, सुंदरम्, रक्त- नील- पीतवर्णेषु, शोभायमानम्, सज्जायाम्, , देवानाम्

अथवा

मंजूषाप्रदत्तशब्दानां सहायतया निम्नलिखितं विषयम् अधिकृत्य न्यूनातिन्यूनं पंचभिःसंस्कृतवाक्यैः एकम् अनुछेदं लिखत- 1 x 5 = 5

docs.aglasem.com
aglasem.com

"जलम् एव जीवनम्"

मञ्जूषा

जलम्, जीवनस्य, अन्नानि, फलानि, स्नानाय, कृषिकार्ये, सिञ्चनम्, आधार:, महत्वपूर्णम्

प्रश्न -4 अधोलिखितानि वाक्यानि संस्कृतभाषया अनूद्य लिखत- (केवलं वाक्यपञ्चकम्) 1 x 5 =5

I. संस्कृत भाषा विश्व में प्रसिद्ध है। Sanskrit language is famous in the world.
II. हम खेलने नहीं जाएंगे। We will not go to play.
III. चंद्रगुप्त भारत का राजा था। Chandragupta was the king of India.
IV. मैंने मित्र को पत्र लिखा। I write a letter to a friend.
V. हिमालय सभी पर्वतों में ऊंचा है। Himalaya is the highest of the all mountains.
VI. उसके विद्यालय के चारों ओर वृक्ष है। There are trees around his her school.
VII. मित्रों! तुम सब पढ़ो। Friends you all read.

खण्ड ग

अनुप्रयुक्तव्याकरणम् (25अङ्का:)

प्रश्न -5 अधोलिखितेषु वाक्येषु रेखांकितपदेषु संधिं संधिच्छेदं वा कुरुत- (केवलं प्रश्नचतुष्टयम्) 1 x 4 =4

I. सविता रक्त:+चास्तमये तथा।
II. आरक्षिणा यदुक्तं तद् वर्णयामि।
III. नय माम् अस्मान्नगरात्।
IV. मानवाय जीवनं कामये नो जीवन+ मरणम्।
V. कुसुमावलि: समीरचालिता स्यान्मे वरणीया।

प्रश्न -6 अधोलिखितवाक्येषु रेखांकितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्य: चित्वा लिखत – (केवलं प्रश्नचतुष्टयम्) 1 x 4 =4

I . समलं धरातलं जातम्।

क) मलेन सहितम् ख) स मलं

ग) सहं मलम् घ) मैल सहितम्

II. देहस्थितो देहस्य विनाशनाय।

क) देहनाशाय ख) देहविनाशम्

ग)देहविनाशनाय घ) देहं विनाशाय

III. शरीरस्थो महान् रिपु:।

क) शरीरं स्थित: ख) शरीरे स्थित:

docs.aglasem.com
aglasem.com

ग)शरीर स्थो घ) शरीरेण स्थो

IV. तदेवाहू: महात्मान: ।

क)महान् आत्मा येषाम् ख) महा आत्मान:

ग) महा आत्मा घ) महद् आत्मन:

V. तत: प्रविशत: कुशश्च लवश्च ।

क) कुशलवम् ख) कुश:लव:

ग) कुशा लव: घ) कुशलवौ

प्रश्न -7. अधोलिखितवाक्येषु रेखांकितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्य: चित्वा लिखत – (केवलं प्रश्नचतुष्ट्यम्) 1 x 4 =4

1. समत्वमिति तथ्यत: ।

क) स+मत्व ख) सम्+त्व

ग) सम्+क्त्वा घ)सम्+त्व

II. जननी तुल्यवत्सल+ टाप् ।

क) तुल्यवत्सलम् ख) तुल्यवत्सला

ग) तुल्यवत्सलाम् घ) तुल्यवत्सलय

III. पाषाण +ङीप् सभ्यता निसर्गे ।

क) पाषाणी ख) पाषाण:

ग) पाषाणाम् घ) पाषाणम्

IV. अवक्र+तल् यथा चित्ते ।

क) अवक्रता ख) अवक्रतम्

ग) अवक्रा घ) अवक्र:

V. प्रथममवतीर्णा वसुमतीम् ।

क) वसु + तल् ख) वसु + मतुप्

ग) वसु + तीम् घ) वसु + त्व

प्रश्न -8 वाच्यानुसारम् उचितपदै: रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं पुनः लिखत- (केवलं प्रश्नत्रयम्) 1 x 3 =3

I. …………सत्यम कथितम् ?

क) त्वया ख)युवयो:

docs.aglasem.com

aglasem.com

ग) त्वम्　　　　　　घ)यूयम्

II. काक: पिकस्य संततिं ……।

क) पाल्यते　　　　　　ख)पालितम्

ग) पालयति　　　　　　घ)पालयत:

III. …………….कोऽपि खग एव वनराज: कर्तुमिष्यते स्म।

क) सर्वै:खगै:　　　　　　ख) सर्वै:खगान्

ग) सर्वै:खगा:　　　　　　घ) सर्वं खगै:

IV. ………………प्रवर्ष:समजायत।

क) मेघरवं　　　　　　ख) मेघरवात्

ग) मेघरवै:　　　　　　घ) मेघरवेषु

प्रश्न -9 कालबोधकै: अधोलिखित -वाक्यानि पूरयत- (केवलं प्रश्नचतुष्ट्यम्) 1 x 4 =4

I. प्रातः(9:30)……………….. वादने प्रार्थना।
II. प्रातः(11:00)…………... वादने प्रतियोगिताया: आयोजनम्।
III. मध्याह्ने(12:15)………….. वादने पारितोषिक- वितरणम्।
IV. अपराह्ने(1:45) …………...मुख्यातिथे: भाषणम्।
V. तदनंतरं(2:30)……………. वादने प्रीतिभोजम्।

प्रश्न -10 मञ्जूषायां प्रदतै: उचितै: अव्ययपदै: अधोलिखित -वाक्येषु रिक्तस्थानानि पूरयत – (केवलं प्रश्नत्रयम्) 1 x 3 =3

1. कुश: लव:………... प्रविशत:।
2. किं वयम्…………. कुशलप्रश्नस्य भाजनम्।
3. अहम्………….. कुश इत्यात्मानं श्रावयामि।
4. यत्र हरीतिमा………….. शुचि पर्यावरणम्।

मञ्जूषा

तत्र, अपि ,अत्र ,च

प्रश्न -11. अधोलिखितवाक्येषु रेखाङ्कित-अशुद्धपदाय उचितं पदं चित्वा वाक्यनि पुनः लिखत- (केवलं प्रश्नत्रयम्) 1 x 3=3

I. स: गृहस्य निष्क्रम्य बहिरागच्छत्।

क) गृहौ　　　　　　ख) गृहात्

docs.aglasem.com

aglasem.com

ग) गृहयो: घ) गृहौ

II. चौरस्य पादध्वनिं प्रबुद्ध: अतिथि: ।

क) पादध्वनि: ख)पादध्वनीनाम्

ग) पादध्वनौ घ) पादध्वनिना

III. गुणी गुणं जानन्ति ।

क) जानीम: ख) जानासि

ग) जानाति घ) जानीव:

IV. तत: प्रविशत: प्रकृतिमाता ।

क) प्रविशसि ख) प्रविशति

ग) प्रविशाम: घ)प्रविष्यन्ति

खण्ड -घ

पठितावबोधनम् (30 अङ्का:)

प्रश्न -12.अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत- (5)

अस्ति देउलाख्यो ग्राम: । तत्र राजसिंह नाम राजपुत्र: वसति स्म । एकदा केनापि आवश्यककार्येण तस्य भार्या बुद्धिमती पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता । मार्गे गहने वने सा एकं व्याघ्रं ददर्श । सा व्याघ्रमागच्छन्तं दृष्ट्वा धाष्टर्यात् पुत्रौ चपेटया प्रहृत्य जगाद - कथमेकैकशो व्याघ्रभक्षणाय कलहं कुरूथ ? अयमेकस्तावद् विभज्य भुज्यताम् । पश्चाद् अन्यो द्वितीय: कश्चित् लक्ष्यते । इति श्रुत्वा व्याघ्रमारी काचिदियमिति मत्वा व्याघ्रो भयाकुलचित्तो नष्ट: ।

अ .एकपदेन उत्तरत-(केवलं प्रश्नद्वयम्) 1 /2 x 2 =1

I. ग्रामस्य नाम किम् ?
II. राजपुत्रस्य नाम किम् आसीत् ?
III. को भयाकुलचित्तो नष्ट: ?

आ. **पूर्णवाक्येन उत्तरत—(केवलं प्रश्नद्वयम्) 1 x 2 =2**

I. सा मार्गे किं ददर्श ?
II. पश्चाद् किं लक्ष्यते ?
III. बुद्धिमती कं प्रति चलिता ?

इ . निर्देशानुसार उत्तरत--(केवलं प्रश्नद्वयम्) 1 x 2 =2

I. “गहने वने” अनयो: पदयो: विशेषणपदं किम् ?
II. “पत्नी” इति पदस्य पर्यायपदं किं प्रयुक्तम् ?
III. “ददर्श” इति क्रियापदस्य कर्तृपदं किम् ?

docs.aglasem.com

aglasem.com

प्रश्न -13. अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत-(5)

रे रे चातक! सावधान मनसा मित्र! क्षणं श्रूयता-

मम्बोधा: बहवो हि सन्ति गगने सर्वेऽपि नैतादृशा: ।

केचिद् वृष्टिभिरार्द्रयन्ति वसुधां गर्जन्ति केचिद् वृथा,

यं यं पश्यसि तस्य तस्य पुरतो मा ब्रूहि दिनं वच: ।।

अ .एकपदेन उत्तरत-(केवलं प्रश्नद्वयम्) 1/2 x 2 =1

I. अम्भोदा: कुत्र सन्ति ?
II. के गर्जन्ति ?
III. अम्भोदा: केन आर्द्रयन्ति

आ. पूर्णवाक्येन उत्तरत—(केवलं प्रश्नद्वयम्) 1 x 2 =2

I. अम्भोदा: कुत्र सन्ति ?
II. के वृथा गर्जन्ति ?
III. कीदृशं वच: मा ब्रूहि ?

इ . निर्देशानुसार उत्तरत—(केवलं प्रश्नद्वयम्) 1 x 2 =2

I. "दीनं वच:"अनयो: पदयो: विशेषणपदं किम् ?
II. "आकाशे" इति पदस्य पर्यायपदं किं प्रयुक्तम् ?
III. "गर्जन्ति" इति क्रियापदस्य कर्तृपदं किम् ?

प्रश्न -14 .अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत- (5)

काक: -आम् सत्यं कथितम् त्वया । वस्तुतः वनराज: भवितुं तु अहमेव योग्य: ।

पिक: - (उपहसन) कथं त्वं योग्य: वनराज: भवितुं, यत्र - तत्र का-का इति कर्कशध्वनिना वातावरणम् आकुलीकरोषि । न रुपं न ध्वनि: अस्ति । कृष्णवर्णं मेध्यामेध्यभक्षकं त्वां कथं वनराजं मन्यामहे वयम् ?

काक: -अरे! अरे! किं जल्पसि ? यदि अहं कृष्णवर्ण: तर्हि त्वं किं गोराङ्ग: ? अपि च विस्मृर्यते किं यत् मम सत्यप्रियता तु जनानां कृते उदाहरणस्वरूपा – "अनृतं वदसि चेत् काक: दशेत्" इति प्रकारेण अस्माकं परिश्रम: ऐक्यं च विश्वप्रसिद्धम् । अपि च काकचेष्ट: विद्यार्थी एव आदर्शच्छात्र: मन्यते ।

अ .एकपदेन उत्तरत-(केवलं प्रश्नद्वयम्) 1/2 x 2 =1

I. का का इति ध्वनि क: करोति ?
II. काकस्य वर्णं किम् ?
III. कस्य परिश्रम: विश्वप्रसिध्द:?

आ. पूर्णवाक्येन उत्तरत—(केवलं प्रश्नद्वयम्) 1 x 2 =2

I. काक: कीदृशीं ध्वनिं करोति ?
II. अनृतं वदसि चेत् किं भवति ?

docs.aglasem.com

aglasem.com

III. किं विश्वप्रथितम् ?

इ . निर्देशानुसार उत्तरत—(केवलं प्रश्नद्वयम्) 1 x 2 =2

I. "विद्यार्थी" इत्यस्य विशेषणपदं किम् ?
II. "असत्यम्" इति पदस्य पर्यायपदं किं प्रयुक्तम् ?
III. "मन्यते" इति क्रियापदस्य कर्तृपदं किम् ?

प्रश्न -15 रेखांकितपदानि आधृत्य प्रश्ननिर्माणं कुरुत (केवलं प्रश्नचतुष्ट्यम्) 1 x 4 =4

I. विमूढधी: अपक्वं फलं भुङ्क्ते ।
II. जनकेन सुताय विद्याधनं दीयते ।
III. वस्तुतः आरक्षी चौर: आसीत् ।
IV. चौर: कारादंडं लप्स्यते ।
V. सर्वे पक्षिण: सज्जायै गन्तुम इच्छति ।

प्रश्न -16. मंजूषात:समुचितपदानि चित्वा अधोलिखितश्लोकस्य अन्वय पूरयित्वा पुनः लिखत – 1 x 4 =4

यत् प्रोक्तं येन केनापि, तस्य तत्वार्थनिर्णय: ।

कर्तुं शक्यो भवेद्येन, स विवेक इतीरित: ।।

अन्वय: - येन………….. अपि यत् प्रोक्तं तस्य……………..येन कर्तुं शक्य:…………..स:……………इति ईरित: ।

मञ्जूषा

भवेत्, केन , तत्त्वार्थनिर्णय: , विवेक:

अथवा

मञ्जूषाया: सहायतया श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत- 1 x 4 =4

अवक्रता यथा चित्ते तथा वाचि भवेद् यदि ।

तदैवाहु: महात्मान: समत्वमिति तथ्यत: ।

भावार्थ: -यथा अवक्रता चित्ते………., अवक्रता यदि वाचि अपि…………….. तदा एव…………….. तथ्यत: तदेव…………….. इति आहू: ।

मञ्जूषा

महात्मान:, समत्वम्, भवेत्, तथा

docs.aglasem.com

aglasem.com

प्रश्न -17 अधोलिखितं कथाशं समुचित- क्रमेण लिखत- 1/2 x 8 =4

I. न्यायाधीश: आरक्षणे कारादंडम् आदिश्य तं जनं ससम्मानं मुक्तवान्।

II. कश्चन निर्धन: जन: भूरि परिश्रम्य किंचित् वित्तम् उपार्जितवान्।

III. न्यायाधीश: आरक्षिणम् अभियुक्तम् च तं शवं न्यायालये आनेतुम् आदिष्टवान्।

IV. तौ न्यायालये स्व -स्वपक्षं पुनः स्थापितवन्तौ।

V. रक्षापुरुष: तम् अतिथिं चौरोऽयम् इति प्रख्याप्य कारागृहे प्राक्षिपत्।

VI. स: पिता पुत्रस्य रुग्णताम् आकर्ण्य व्याकुल: जात: पुत्रं द्रष्टुं च प्रस्थित:।

VII. स:पार्श्वेस्थिते ग्रामे रात्रिनिवासं कर्तुं कश्चिद् गृहस्थं उपगत:।

VIII. उभौ शवम् आनीय एकस्मिन् चत्वरे स्थापितवन्तौ।

प्रश्न -18 अधोलिखितवाक्येषु रेखांकितपदानां प्रसंगानुकूलम् उचितार्थं चित्वा लिखत (केवलं प्रश्नत्रयम्) 1 x 3 =3

I. एक: शरीरेण दुर्बल: जवेन गन्तुम् अशक्तश्चासीत्।

क) बलेन ख) कृषकेण

ग) क्षेत्रेण घ) तीव्रगत्या

II. ते चक्षु: नामनी मते।

क) पादम् ख) नासिका

ग) हस्तौ घ) नेत्रम्

III. निर्धन: जन: भूरी परिश्रम्य।

क) क्षेत्रे ख) परिश्रमम्

ग) पर्याप्तम् घ)अल्पम्

IV. तं न्यायालयं नीतवान्।

क) वदति ख) स्थापयति

ग) आगच्छति घ) अनयत्

docs.aglasem.com

aglasem.com